No. ३३२ / घ

Title चन्द्रालोकः

Author जयदेवः पीयूषवर्षः

Extent ११ पत्र Age

Subject अलङ्कार शास्त्र

चंद्रालोककारिकाः

३३२

१७ पत्राणि

कुरंगीणां यूथं निभृतमिदमंगीकृतभयं निरातंकोयं निर्दयहृदयभावोद्यन्नुतरः ।। निवो घोवा कस्मिन्नय मविनयः केसरी युवा
हठान्मत्तेभानां युवतिषु विधत्तेन खपदम् ।। १ ।।

का ञ

३५

नं. २३२५

चन्द्रालोकः
११ पत्राणि

कर्त्ता — जयदेव

पत्र ११

चंद्रालोकोयं [illegible]लोकोत्तरः

॥१॥

१ काव्यप्रकाशे । उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् । हारादिवदलंकारास्तेऽनुप्रासोपमादयः ॥ अलंकारशेखरे । गुणवत्त्वविभिन्नैस्तैरलंकारैः काव्यराजानि जायते · ये गुणप्रमा
दत्तालंकरणैरिव ॥ काव्यादर्शे । काव्यशोभाकरान्धर्मानलंकारान्प्रचक्षते । ते चाद्यापि विकल्प्यन्ते कस्तान्कार्त्स्न्येन वक्ष्यति ॥ वाग्भटालंकारे । दोषमुक्तगुणे युक्तमपि
साधर्म्यमुपमाभेदे इति काव्यप्रकाशे । यथा कथंचित्सादृश्यं यत्रोद्भूतं प्रतीयते । उपमा सेति काव्यादर्शे । उपमानेन सादृश्यमुपमेयस्य यत्र सेति वाग्भटालंकारे ॥

॥श्रीगणेशाय नमः॥ उपमा यत्र सादृश्यं लक्ष्मीरुल्लसति द्वयोः॥ हंसीव कृष्ण ते कीर्तिः स्वर्गंगामवगाहते ॥१॥ वर्ण्योपमानधर्मा-
णामुपमावाचकस्य च । एकद्वित्र्यनुपादानैर्भिन्नालुप्तोपमाष्टधा ॥२॥ तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशो-
र्मम । कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया ॥३॥ यत्त्वया मेलनं तत्र लाभो मे यश्च तद्दृशः॥ तदेतत्काकतालीय-
मवितर्कितसंभवम् ॥४॥ उपमानोपमेयत्वं यदेकस्यैव वस्तुनः॥ इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः॥
५॥ पर्यायेण द्वयोस्तच्चेदुपमे[...]योपमा मता । धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि ॥६॥ श्रीर्जयति ।

१ हृदये खेलतो रुद्धैस्त्वं गीतस्तनयोरिवेति चन्द्रालोकोक्तमुत्तरार्द्धं ।

अभवद्वर्षिं प्रवीमिते इति पाठः कल्प्यः ॥

परस्परमुपमानोपमेयभावविवक्षितयोः ॥ अन्योन्योपमापीयं ॥२

२ लक्ष्मीरुल्लसमन्दिः कांतास्यं चन्द्रसंमितमित्यत्रनुन्नतयं इति केचित् । साधर्म्यानिरूपितयोरुपमानोपमेययोर्विवक्षया · २ असाधारणोपमा सोपमापि · २

काव्यप्रकाशे । उपमानोपमेयत्वे एकस्यैवैकवाक्यगे ॥ अनन्वयो विपर्यासे उपमेयोपमा तयोरिति · २

श्रीः
॥१॥

काव्यप्रकाशे। आक्षेप उपमानस्य प्रतीपमुपमेयता। तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धना चतुर्थपंचमभेदे। २ विपर्यासोपमा। २
प्रतीपानां उपमाविशेषत्वेन गर्भीकृतं मन्यते। अन्ये तु एवं च मं प्रतीपप्रकारमुपमानाक्षेपरूपकत्वात् आक्षेपालंकारमाहुः॥ कुवलयानंदे।

प्रतीपमुपमानस्योपमेयत्वप्रकल्पनं। त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः॥७॥ अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत्। अलं गर्वेण ते वक्त्र कान्त्या चन्द्रोऽपि तादृशः॥८॥ वर्ण्योपमेयलाभेन तथान्यस्याप्यनादरः॥ कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्याः संति हि स्त्रियः॥९॥ वर्ण्येनान्यस्योपमाया अनिष्पत्तिवचश्च तत्। मुधापवादो मुग्धाक्षि त्वन्मुखाभं किलाम्बुजं॥१०॥ प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते। दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दुना॥११॥ विषय्यभेदताद्रूप्यरंजनं विषयस्य यत्। रूपकं तत् त्रिधाधिक्यन्यूनत्वानुभयो-

काव्यादर्शे। उपमैव तिरोभूतभेदा रूपकमिष्यते। वाग्भटालं। रूपकं यत्र साधर्म्यादर्थयोरभिदा भवेत्। अलंकारशेखरे। तद्रूपकमभेदो य उपमानोपमेययोः॥ काव्यप्रकाशे। तद्रूपकमभेदो य उपमानोपमेययोः॥२

क्तिभिः ॥१२॥ अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् । अयमास्ते विना शंभुः स्तार्तीयीकं विलोचनं ।
॥१३॥ शंभुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टितां ॥ अस्या मुखेंदुना लब्धे नेत्रानंदे किमिंदुना ॥१४॥ साध्वी पंचमप्रतीपसंकीर्णमुदाहरणं·
यमपरा लक्ष्मीरसुधा सागरोदिता । अयं कलंकिनः श्चंद्रान्मुखचंद्रोऽतिरिच्यते ॥१५॥ परिणामः क्रिया
र्थश्चेद्विषयी विषयात्मना । प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा ॥१६॥ बहुभिर्बहुधोल्लेखादेक
कस्योल्लेख इष्यते - स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः ॥१७॥ एकेस्य बहुधोल्लेखेऽप्यसौ
न

काव्यादर्शे-अपह्नुतिरपह्नुत्य किंचिदन्यार्थदर्शनं-अलंकार
रत्नाकरे-किंचिदपह्नुत्य यदन्यार्थप्रदर्शनं सापह्नुतिः
काव्यप्रकाशे-प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नु
तिः ॥ वाग्भटालंकारे-नैतदेतदिदं त्वेतदित्यपह्नुवपूर्व
कं-उच्यते यत्र सादृश्यादपह्नुतिरियं यथा-२

वाग्भटालंकारे-वस्तुन्यन्यत्र कुत्रापि तत्तुल्यस्यान्यवस्तुनः ॥ निश्चयो
यत्र जायेत भ्रान्तिमान्स स्मृतो यथा-इदमेतदिदं वेति सा
साम्याद्बुद्धिर्हि संशयः ॥ हेतुभिर्निश्चयोपान्तैर्निश्चयोन्तः स्मृतो यथा-
काव्यप्रकाशे-यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः ॥ स्मरणं भ्रा
न्तिश्च विशेषाः रतिप्रकारकज्ञानत्वं १ संदेहत्वं तु निश्चयभिन्नत्वे
सति संभावनाभिन्नज्ञानत्वं ॥ स्मृतित्वं स्मरामीति अनुभवसाक्षि
कोजातिविशेषः ॥१

विषयभेदतः ॥ गुरुर्वचस्यर्जुनोयं कीर्तौ भीष्मः शरासने ॥१८॥ स्यात्स्मृतिभ्रान्तिसंदेहैस्तदंकालंकृतित्रयं-पंक
जं पश्यतः कान्तामुखं मे गाहते मनः ॥१९॥ अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पंकजं ॥ पंकजं वा सुधांशु
र्वेत्यस्माकं तु न निर्णयः ॥२०॥ शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः ॥ नायं सुधांशुः किं तर्हि व्योमगं
गासरोरुहं ॥२१॥ अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सा ॥ नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमु
खं ॥२२॥ भ्रान्तापह्नुतिरन्यस्य शंकायां भ्रान्तिवारणे ॥ तापं करोति सोत्कंपं ज्वरः किं न सखि स्मरः ॥२३॥

स एव हेतुपूर्वश्चेदुच्यते हेत्वपह्नुतिः ॥ नेंदुस्तीव्रो न निश्यर्कः सिन्धोरौर्वोयमुत्थितः ॥१॥

सम्मानयसंविदन्तु-पदर्शने-संदेहस्तु मध्ये कोटिद्वयानुकोटिसंशयः ॥१

॥३॥

अलंकारशेखरे· अन्यनिमित्तकेवस्तुन्यन्यनिमित्तारोप उत्प्रेक्षा· वाग्भटालंकारे· कल्पना काचिदौचित्याद्यत्रार्थस्य सतोन्यथा· द्योतते वादिभिः शब्दैरुत्प्रेक्षा सा स्मृता यथा· काव्यादर्शे· अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा· अन्यथोत्प्रेक्षते यत्र तामुत्प्रेक्षां विदुर्यथा· काव्यप्रकाशे· संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्· २

२ निर्यान्ति स्मरनाराचाः कांतादृक्पातकैतवात्·२५॥ संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना॥ [illegible]

3 छेकापह्नुतिरन्यस्य शंकातस्तथ्यनिह्नवे· प्रजल्पन्मत्पदे लग्नः कांतः किं नहि नूपुरः॥२४॥ कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुते पदे॥ उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदे परे॥२६॥ घनस्तोमे तनमः शंके केकी विरहभूषणं॥ लिंपतीव तमोङ्गानि वर्षतीवाञ्जनं नभः॥२७॥ रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद्ध्रुवं॥ त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी॥२८॥ मध्यः किं कुचयोर्धृत्यै वद्धः कनकदामभिः॥ प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति॥२९॥ रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः॥ पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः॥३०॥ भेदकातिशयो... सापह्नवा मता· नेह ...

पद्यपह्नुतिगर्भत्वं सैव

नि·

काव्यप्रकाशे· निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्· प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनं· कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः॥ विज्ञेयातिशयोक्तिः सेति· वाग्भटालंकारे· वस्तुनो नकुत्रकर्षमसंभाव्यमुच्यते· यदन्यातिशयाख्यं तमलंकारं बुधा यथा॥ काव्यादर्शे· विवक्षा या विशेषस्य लोकसीमातिवर्तिनि· असावतिशयोक्तिः स्यादिति·

निगीर्य विषयं निगीर्य स्ववाचकशब्देनानुपादायानं विना विषयिवाचकेनैव शब्देन गृहीत्वा अध्यवसानतः विषयस्य विषयिरूपतया आहार्यनिश्चयात्

श्रीः

स्मा

क्तिस्तु तस्यैवान्यत्ववर्णने । अन्यदेवास्य गांभीर्यमन्यद्धैर्यं महीपतेः ॥ ३२ ॥ संबंधातिशयोक्तिः स्यादयोगे योगकल्पनं ॥ सौधाग्रा

णि पुर[redacted] स्पृशंति विधुमंडलं ॥ ३३ ॥ योगेप्ययोगेः संबंधातिशयोक्तिरितीर्यते । त्वयि दातरि राजेंद्र स्वर्द्रुमान्नाद्रियामहे ॥ ३३ ॥ अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः ॥ आलिंगंति समं देव ज्यां शराश्च परांश्च ते ॥ ३४ ॥ चपलाति

शयोक्तिः स्यात्तत्कार्ये हेतुप्रसक्तिजे ॥ यास्यामीत्युदिते तन्व्या वलयो भवदूर्मिका ॥ ३५ ॥ अत्यंतातिशयोक्तिस्तु यो वा

पूर्वव्यतिक्रमे ॥ अग्रे मानो गतः पश्चादनुनीता प्रियेण सा ॥ ३६ ॥ वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता ॥ प्र

काव्यप्रकाशे । नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ॥

वाग्भटालंकारे । उपमेयं समीकर्तुमुपमानेन योज्यते । तुल्यैककालक्रियया यत्र सा

१ संकुचंति स

उपमानोपमेययोः

वर्ण्यावर्ण्या
अलंकारशेखरे · समस्तानामोपकारकत्वं दीपकत्वं · तच्चाभिन्नतत्कारककिक्रयाभेदादनंतं · एतच्च मालारूपकादिभेदाद्बहुलं ॥
तत्र पूर्वापरवाक्ययोरुपकार्योपकारकत्वं खलु मालादीपकं ॥ काव्यादर्शे · जातिक्रियागुणद्रव्यवाचिनैकत्रवर्तिना · सर्ववाक्योपकारश्चेत्
वाग्भटालंकारे · आदिमध्यांतवर्त्येकपदार्थेनार्थसंगतिः ॥ वाक्यस्य यत्र जायेत तदुक्तं दीपकं यथा · काव्यप्रकाशे · सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्र...

उपमानोपमेयभावरहितयोर्धर्मैक्यं ·

यते पराभूतिर्मित्रशात्रवयोस्त्वया ॥ ३९ ॥ गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता ॥ लोकपालो यमः पाशी श्रीदः
शक्रो भवानपि ॥ ४० ॥ वदंति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः ॥ मदेन भाति कलभः प्रतापेन महीपतिः ॥ हि गज इति पाठः
४१ ॥ त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकं ॥ वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी ॥ ४२ ॥ उन्मीलंति कदंबानि स्फु-
टंति कुटजोद्गमाः ॥ माद्यंति चातकास्तृप्ताः माद्यंति च शिखावलाः ॥ ४३ ॥ वाक्ययोरेकसामान्ये प्रतीवस्तूप-
आ· मा मता · तापेन भ्राजते सूर्यः शूरः चापेन राजते ॥ ४४ ॥ चेद्बिंबप्रतिबिंबत्वं दृष्टांतस्तदलंकृतिः ॥ त्वमेव कीर्ति-
मान् राजन् विधुरेव हि कांतिमान् ॥ ४५ ॥ वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना ॥ यद्दातुः सौम्यता सेयं पू-

यत्र वाक्यद्वयोस्थितिः ॥ प्रतिवस्तूपमा सा तु ॥
वाग्भटालंकारे · अनुपमा विवादीनां वस्तुनः प्रतिवस्तुना ॥

वाग्भटालंकारे ·
अन्वयव्यापनं यत्र
क्रिययास्वतदर्थयोः ॥ तं दृष्टांतमिति
प्राहुरलंकारमनीषिणः इति ·

एतेन किंचित्सदृशं
काव्यप्रकाशे ·

काव्यप्रकाशे॥ उपमानाद्यदन्यस्य व्यतिरेकः स एव सः॥

काव्यादर्शे॰ शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः॥

॥ श्रीः॥

ऽन्तेअकलंकता॥४६॥ पदार्थवृत्तिमप्येकेवदंत्यन्यांनिदर्शनां॥ त्वन्नेत्रयुगलंधत्तेलीलांनीलांबुजन्मनोः॥४७॥ अथ
प्रबोधनंप्राहुः क्रिययासत्त्वदर्पयोः॥ नश्येद्राजविरोधीतिक्षीणंचंद्रोदयेतमः॥४८॥ उदयन्नेवसवितापद्मे
ष्वर्पयतिश्रियं॥ विभावयन्समृद्धीनांफलंसुहृदनुग्रहं॥४९॥ व्यतिरेकोविशेषश्चेदुपमानोपमेययोः॥
शैलाइवोन्नताःसंतः किंतुप्रकृतिकोमलाः॥५०॥ सहोक्तिःसहभावश्चेद्भासतेजनरंजनः॥ दिगंतमग
मत्तस्यकीर्तिःप्रत्यर्थिभिःसह॥५१॥ विनोक्तिश्चेद्विनाकिंचित्प्रस्तुतंहीनमुच्यते॥ विद्याहृद्यापिसावद्याविना

काव्यादर्शे-सहोक्तिः सहभावेन कथनं गुणकर्मणां।

काव्यप्रकाशे॰ विनोक्तिः

॥५॥

काव्य- परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः ॥ वाग्भटालं- उक्त्यैव ...प्रतीतिजननक्षमं ...

साभिप्राये प्रकृतार्थोपपादक ... कार्यविषयाविषयाभिप्रायपूर्वके

विनयसंपदः ॥५२॥ तच्चेत्किंचिद्विनारम्यं विनोक्तिः सापि कथ्यते । विना खलैर्विभात्येषा राजेन्द्र भवतः सभा ॥५३॥
समासोक्तिः परिस्फूर्तिः प्रस्तुते प्रस्तुतस्य चेत् । अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः ॥५४॥ अलंकारः परिकरः
साभिप्राये विशेषणे । सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः ॥५५॥ साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः
चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः ॥५६॥ नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयास्पदः ॥ सर्वदो मा
धवः पायात्स योऽगं गामदीधरत् ॥५७॥ अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना ॥ उच्चरद्भूरिकीलालः शुशुभे
वाहिनीपतिः ॥५८॥ अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया ॥ एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते ॥५९॥

श्रीः

काव्यादर्शे- श्लिष्टमनेकार्थमेकरूपान्वितं वचः ॥ तदभिन्नपदं भिन्नपदप्रायमिति द्विधा- काव्यप्रकाशे-
एकस्मिन्यत्रानेकार्थता भवेत् वाग्भ- पदैस्तैरेव भिन्नैर्वा वाक्यं वक्त्यनेकार्थं ...

॥श्रीः॥

5

काव्य· पर्यायो
पर्यायोक्तं·

काव्यादर्शे· अर्थमिष्टमनाख्याय साक्षात्तस्यैव सिद्धये·
यत्प्रकारान्तराख्यानं पर्यायोक्तं तदिष्यते·
श्रीश्रीः
यत्र वाच्य भवत्युपपत्ति वक्तव्यमानेन तस्य
विवक्षितं प्रतीयते पर्यायोक्तमिदं यथा·

॥६७॥

व·

प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः ॥ किं भृङ्ग सत्यां मालत्यां केतक्या कण्टकेद्धया ॥ ६० ॥ पर्यायोक्तं तु गम्यस्य वचो भङ्ग्यन्तराश्रयं ॥
नमस्तस्मै कृतो येन मुधा राहुवधूकुचौ ॥ ६१ ॥ पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनं ॥ यामि चूतलतां द्रष्टुं युवाभ्यामास्यतामि-
ह ॥ ६२ ॥ उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः ॥ कः स्वर्धुनि विवेकस्ते पापिनो नयसे दिवं ॥ ६३ ॥ साधु दूति पु-
नः साधु कर्तव्यं किमतः परं ॥ यन्मदर्थे विलूनासि दन्तैरपि नखैरपि ॥ ६४ ॥ निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गी-
यते ॥ विधे स निन्द्यो यस्ते प्रागेकमेवाहरच्छिरः ॥ ६५ ॥ विभावना विनापि स्यात्कारणं कार्यजन्म चेत् ॥ आक्षेपः
स्वयमुक्तस्य प्रतिषेधो विचारणात् ॥ ६६ ॥ चन्द्र संदर्शयात्मानम् अथवास्ति प्रिया मुखं ॥ निषेधाभासमाक्षेपं बुधाः

आक्षेपोन्यो विधौ व्यक्ते प्रतिषेधे तिरोहिते· गच्छ गच्छसि चेत्कान्त तत्रैव स्याज्जनि-
र्मम

॥६॥

आभासत्वे विरोधस्य विरोधाभास इष्यते विनापि तन्विहारेण वक्षोजौ तव हारिणौ। विभावना विनापि स्यात्
कारणं कार्यजन्म चेत्। अप्यलाक्षारसासिक्तं रक्तं तच्चरणद्वयं॥ हेतूनामसमग्रत्वे कार्योत्पत्तिः

केचन मन्यते॥ कोऽहं हृतीतनोस्तापस्तस्याः कालानलोपमः॥ ६७॥ कार्योत्पत्तिस्तृतीयास्यात्सत्यपि प्रतिबंधके॥ नरें
द्रानेव ते राजन्दशत्यसिभुजंगमः॥ ६८॥ अकारणात्कार्यजन्म चतुर्थी तद्विभावना॥ शंखाद्वीणानिनादोयं
मुदेति महदद्भुतं॥ १०० ॥ विरुद्धात्कार्यसंपत्तिर्दृष्टा काचिद्विभावना॥ यशः पयोधिरभवत्करकल्पतरोस्तव॥ १
२॥ कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे। हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि॥ १३॥ असंभवो
र्थनिष्पत्तेरसंभाव्यत्ववर्णनं॥ कोवेद गोपशिशुकः शैलमुत्पाटयेदिति॥ १४॥ विरुद्धं भिन्नदेशत्वं कार्यहेत्वो
रसंगतिः॥ विषं जलधरैः पीतं मूर्छिताः पथिकांगनाः॥ १५॥ अन्यत्रकरणीयस्य ततोन्यत्रकृतिश्च सा॥

शीतांशुकिरणास्तन्वीं हंत संतापयंतिताः॥ कार्यात्कारणजन्मापि द

काव्यादि भावना:

भ्रमरा अशोकतरोः किसलयोद्गम ... जायते मन्मथः॥

॥श्री॥

अन्यत्कर्तुंप्रवृत्तस्यतद्विरुद्धकृतिस्तथा ॥७६॥ अपारिजातांवसुधांचिकीर्षन्[द्यां]तथाकृथाः ॥ गोत्रोद्धारप्रवृत्तोपिगोत्रोद्वेदं[तथा]पुराकथोः ॥७७॥ वि-
षमंवर्ण्यतेयत्रघटनाननुरूपयोः ॥ क्वेयंशिरीषमृद्वङ्गीक्वतावन्मदनज्वरः ॥ विरूपकार्यस्योत्पत्तिरपरंविषमंमतं ॥ कीर्तिंप्रसूते
धवलांश्यामातवकृपाणिका ॥७८॥ अनिष्टस्याप्यवाप्तिश्चतदिष्टार्थसमुद्यमात् ॥ भक्ष्याशयाहिमञ्जूषांदष्ट्वाखुस्तेनभक्षितः ॥
॥७९॥ समंस्याद्वर्णनंयत्रद्वयोरप्यनुरूपयोः ॥ स्वानुरूपंकृतंसद्महारेणकुचमण्डलं ॥८०॥ सारूप्यमपिकार्यस्यकारणेनसमंविदुः
नीचप्रवणतालक्ष्मीजलजायास्तवोचिता ॥८१॥ विनानिष्टंचतत्सिद्धिर्यदर्थंकर्तुमुद्यमः ॥ युक्तोवारणलाभोयंस्यान्नतेवारणार्थि-
नः ॥८२॥ विचित्रंतत्प्रयत्नश्चेद्विपरीतफलेच्छया ॥ नमन्तिसन्तस्त्रैलोक्यादपिलब्धुंसमुन्नतिं ॥८३॥ अधिकंपृथुलाधारादाधेयाधि-
क्यवर्णनं ॥ ब्रह्माण्डानि[जले]यत्रतत्रमान्तिनतेगुणाः ॥८४॥ पृथ्वा[...]धेयाद्यदाधाराधिक्यंतदपितन्मतं ॥ कियद्वाग्ब्रह्मयत्रैतेविश्राम्य

काव्य॰ विनाप्रसिद्धमाधारमाधेयस्य व्यवस्थितिः। एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा॰
अन्यत्प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः। तथैव करणं चेति विशेषस्त्रिविधस्मृतः

तथाकारि तत्कार्यसाधनवस्तु अन्यथाकारि तत्कार्यविरुद्धकार्यसाधनं चेत्क्रियेत तदा व्याघातः

त्रिगुणा स्तवं ॥ ८५ ॥ अल्पंतु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता ॥ मणिमालोर्मिका तेऽद्य करे जपवटीयते ॥ ८६ ॥ अन्योन्यं नाम यत्र स्यादुप
कारः परस्परं ॥ त्रियामा शशिना भाति शशी भाति त्रियामया ॥ ८७ ॥ विशेषः ख्यातमाधारं विनाप्याधेयवर्णनं ॥ गतेपि
सूर्ये दीपस्थास्तमश्छिंदंति तत्कराः ॥ ८८ ॥ विशेषः सोपि यद्येकं वस्त्वनेकत्र वर्ण्यते ॥ अंतर्बहिः पुरः पश्चात्सर्वदि[illegible]पि सैव हि ष्व
॥ ८९ ॥ किंचिदारंभतोऽशक्यवस्त्वंतरकृतिश्च सः ॥ त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणं ॥ ९० ॥ स्याद्व्याघातोऽन्यथाका
रि तथाकारि क्रियेत चेत् ॥ यैर्जगत्प्रीयते हंति तैरेव कुसुमायुधः ॥ ९१ ॥ सौकर्येण निबद्धापि क्रिया कार्यविरोधिनी ॥
दया चेद्बाल इति मां पाप रक्ष्यः स एव ते ॥ ९२ ॥ गुंफः कारणमाला स्याद्यथाप्राक्प्रांतकारणैः ॥ नयेन श्रीः श्रिया त्या
गस्त्यागेन विपुलं यशः ॥ ९३ ॥ गृहीतमुक्तरीत्यार्थश्रेणिरेकावली मता ॥ नेत्रे कर्णांतविश्रांते कर्णौ दोःस्तंभदोलिनौ ॥ ९४ ॥

काव्य॰ यद्योत्तरं चेत्पूर्वस्य पूर्वस्यार्थस्य हेतुता॰ तदा कारणमाला स्यात्

यद्वा तत्कार्यविरु

काव्य॰ यद्यथा साधितं केनाप्यपरेण तदन्यथा॰ तथैव तद्विधीयेत स व्याघात इति स्मृतः

काव्य॰ स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परं॰ विशेषणतया यत्र वस्तु सैकावली मता॰ वाग्भ॰ पूर्वपूर्वार्थवैशिष्ट्यनि
बंधनमुत्तरोत्तर॰ अर्थानां यत्र विरचना तु धीरैरेकावली मता॰

॥श्रीः॥

३ एकं क्रमेणानेकस्मिन् पर्यायः

काव्य· उत्तरोत्तरमुत्कर्षो भवेत्सारः पराविधिः
अलं· उत्तरोत्तरं यत्र सारोत्कर्षः स सारः

मालादीपकमाद्यं चेत् यथोत्तरगुणावहं

वाग्भ· यत्रोक्तानां पदार्थानामर्थाः संबंधिनः पुनः क्रमेण तेन युज्यंते त

त ४ काव्य· अन्यस्ततोऽन्यथा

केशस्तोमो जानुपर्यन्तप्रलंबनमनोहरो ॥ जानुनी रत्नमुकुराकारे तस्य महीभुजः ॥९५॥ दीपकैकावलीयोगान्मालादीपकमिष्यते ॥ स्मरेण· यथासंख्यमुच्यते·
हृदये तस्याः स्तेनैषिकृतास्थितिः ॥९६॥ उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते ॥ मधुरं मधु तस्माच्च सुधा तस्याः कवेर्वचः ॥९७॥ यथासं | काव्य· इदमेव लक्षणं·
ख्येक्रमेणैव क्रमिकाणां समन्वयः ॥ शत्रुं मित्रं विपत्तिं च जय रंजय भंजय ॥९८॥ पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः ॥ पद्मं मु का
गताचंद्रं कामिनीवदनप्रभा ॥९९॥ एकस्मिन् यद्यनेकं वा पर्यायः सोपि संमतः ॥ अधुना पुलिनं तत्र यत्र स्रोतः पुराऽजनि ॥१००॥ परिवृत्ति·
विनिमयो न्यूनाभ्यधिकयोर्मिथः ॥ जग्राहैकं शरं मुक्त्वा कटाक्षान् स रिपुश्रियम् ॥१०१॥ परिसंख्या निषिध्यैकमेकस्मिन् वस्तुयंत्र
त्रोणं ॥ स्नेहक्षयः प्रदीपेषु न स्वांतेषु नतभ्रुवां ॥१०२॥ विरोधे तुल्यबलयोर्विकल्पालंकृतिर्मता ॥ सद्यः शिरांसि चापान्वा नमयंतु महीभुजः ॥
१०३॥ बहूनां युगपद्भावभाजां गुंफः समुच्चयः ॥ नश्यंति पश्चात्पश्यंति त्रस्यंति च भवद्द्विषः ॥१०४॥ अहं प्राथमिकाभाजामेककार्यान्वयेपि
सः ॥ कुलं रूपं वयो विद्या धनं च मदयत्यमुं ॥१०५॥ क्रमिके कगतानां तु गुंफः कारकदीपकं ॥ गच्छत्यागच्छति पुनः पान्थः पश्यति पृच्छति ॥१०६॥

काव्या· उद्दिष्टानां पदार्थानामनुद्देशे यथाक्रमं ॥ यथासंख्यमिति क्रमं संख्यानं क्रम इत्यपि·

काव्याद· अर्थानां यो विनिमयः परिवृत्तिर्मता यथा· काव्यप्र· परिवृत्तिर्विनिमयो योऽर्थानां स्यात् समासमैः

वाग्भ· एकत्र यत्र वस्तूनामनेकेषां निबंधनं· आत्पूर्व
शापकर्तृणां तद्वदंति समुच्चयं· काव्य· तत्सिद्धि
हेतावेकस्मिन् यत्रान्यत्तत्करं भवेत्· समु·

वाग्भ· यत्र साधारणं किंचिदेकत्र प्रतिपाद्यते·
अन्यत्र तन्निषेधेन सा परिसंख्योच्यते यथा·
काव्य· किंचित्पृष्टमपृष्टं वा कथितं यत्प्रकल्पते·
तादृगन्यव्यपोहाय परिसंख्या तु सा मता·

वाग्भ· परिवर्तनमर्थस्य सदृशासदृशेन वा· जायते यस्य यत्रासौ परिवृत्तिर्मता यथा·

र

६

समाधिः कार्यसौकर्यं कारणांतरसंनिधेः ॥ उत्कंठिता च तरुणी जगामास्तं च भानुमान् ॥ १०७ ॥ प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ॥ जे
त्रनेत्रानुगौ कर्णौ उत्पलाभ्यामधः कृतौ ॥ १०८ ॥ कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते ॥ स जितः त्वन्मुखेनेंदुः का वार्ता सरसी
रुहां ॥ १०९ ॥ समर्थनीयस्यार्थस्य काव्यलिंगं समर्थनं ॥ जितोऽसि मंद कंदर्प मच्चित्तेऽस्ति त्रिलोचनः ॥ ११० ॥ उक्तिरर्थांतरन्यासः
स्यात्सामान्यविशेषयोः ॥ हनूमानब्धिमतरद्दुष्करं किं महात्मनां ॥ १११ ॥ गुणवद्वस्तुसंयोगाद्याति स्वल्पोऽपि गौरवं ॥ पुष्पमालानु
षंगेण सूत्रं शिरसि धार्यते ॥ ११२ ॥ यस्मिन्विशेषसामान्यविशेषाः स विकस्वरः ॥ स न जिग्ये महांतो हि दुर्धर्षाः सागरा इव ॥ ११३ ॥
प्रौढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वकल्पनं ॥ कचाः कलिंदजातीरतमालस्तोममेचकाः ॥ ११४ ॥ संभावनं यदीत्थं स्यादित्यूहोऽ
न्यस्य सिद्धये ॥ यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव ॥ ११५ ॥ किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थांतरकल्पनं ॥ मिथ्या
ध्यवसितिर्वेश्यां वशयेत्खस्रजं वहन् ॥ ११६ ॥ प्रस्तुतेन वर्ण्यवाक्यार्थप्रतिबिंबस्य वर्णनं ॥ ललितं निर्गते नीरे सेतुमेषा चि

वर्णये स्याद् वृत्तान्ते

काठिन्यं कुचयोः स्रष्टुं वाञ्छन्त्याः पादपद्मयोः ॥ निन्दति च विधातारं त्वद्धाटीष्वटवीगता ॥१३३

तद्भाग्यं धनस्यैव यान्नाश्रयति सज्जनं ॥ तामेव मेघ मण्पाल सेवकानौन्न चेद्धः ॥१३४

कुर्वीत मा वो गुणात्ते न वर्ण्यतः ॥ अत्र प्रथचतुर्थयोरल्लासोन्नथीः ॥ न धन्यो प्रध त्रिन्या

ये लक्ष्मा द्विगाकः ३४ ॥

कुर्वति ॥११७॥ उत्कंठितार्थसंसिद्धिर्विनायत्नं प्रहर्षणं ॥ तामेव ध्यायते तस्मै निसृष्टा सैव दूतिका ॥११८॥ वांछितादधिकार्थस्य सं-
सिद्धिश्च प्रहर्षणं ॥ दीपमुद्योजयेद्यावत्तावदभ्युदितो रविः ॥ ११९ ॥ इष्यमाणविरुद्धार्थसंप्राप्तिस्तु विषादनं ॥ दीपमुद्योजये
द्यावन्निर्वाणस्तावदेव सः ॥ १२० ॥ यत्नोद्यमाद्यासिद्ध्यर्थात्साक्षाल्लाभः फलस्य चेत् ॥ निध्यंजनौषधीमूले खनता
साधितो निधिः ॥ १२१ ॥ एकस्य गुणदोषाभ्यामुल्लासोन्यस्य तौ यदि ॥ अपि मां पावयेत्साध्वी स्नात्वेतीच्छति जाह्नवी ॥ १
२२ ॥ ताभ्यां तौ यदि न स्यातामवज्ञालंकृतिस्तु सा ॥ स्वल्पमेवाम्बु लभते प्रस्थं प्राप्यापि सागरं ॥ १२३ ॥ दोषस्याभ्यर्थना
नुज्ञा तत्रैव गुणदर्शनात् ॥ विपदः सन्तु नः शश्वद्यासु संकीर्त्यते हरिः ॥ १२४ ॥ सूच्यार्थसूचनं मुद्राप्रकृतार्थपरैः
पदैः ॥ नितंबगुर्वी तरुणी दृग्युग्मविपुला च सा ॥ १२५ ॥ क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः ॥ चतुरास्यपति
लक्ष्म्याः सर्वज्ञस्त्वं महीपते ॥ १२६ ॥ तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः ॥ पद्मरागायते नासा मौक्तिकं तेऽधरत्विषा ॥ १२७

ठां

पुनः स्वगुणसंप्राप्तिः पूर्वरूपमुदाहृतं ॥ हरकंठांशुलिप्तोपि शेषस्त्वद्यशसासितः ॥ १२८ ॥ पूर्वावस्थानुवृत्तिश्चेद्विकृते सतिवस्तुनि ॥ दीपेनिर्वा
९ पितेप्यासीत्काञ्चीरत्नैर्महन्महः ॥ १२९ ॥ संगतान्यगुणानंगीकारमाहुरतद्गुणं ॥ चिरं रागिणि मच्चित्ते निहितोपि न रंजसि ॥ १३० ॥ प्राक्
सिद्धस्वगुणोत्कर्षोनुगुणः परसंनिधेः ॥ नीलोत्पलानि दधते कटाक्षैरतिनीलतां ॥ १३१ ॥ मीलितं यदि सादृश्याद्भेद एव न दृश्यते ॥ रसो
नालक्षिलाक्षायाः चरणे सहजारुणे ॥ १३२ ॥ सामान्यं यदि सादृश्याद्विशेषो नोपलक्ष्यते ॥ पद्माकरप्रविष्टानां मुखं नालक्षि
सुभ्रुवां ॥ १३३ ॥ भेदवैशिष्ट्ययोः स्फूर्तावुन्मीलितविशेषकौ ॥ हिमाद्रिं त्वद्यशोमग्नं सुराः शीतेन जानते ॥ १३४ ॥ लक्षि
तान्युदितेन्दौ पद्मानि च मुखानि च ॥ किंचिदाकूतसहितं स्यादगूढोत्तरमुत्तरं ॥ यत्रासौ वेतसी पान्थ तत्रेयं सुतरा स
रिता ॥ प्रश्नोत्तरान्तराभिन्नमुत्तरं चेन्न मुच्यते ॥ १३६ ॥ केदारपोषणरताः के खेटाः किं चलं वयः ॥ सूक्ष्मं पराशयाभिज्ञेतर
साकूतचेष्टितं ॥ मयि पश्यति सा केशैः सीमन्तमणिमावृणोत् ॥ विहितं परवृत्तान्तज्ञातुः साकूतचेष्टितं ॥ १३८ ॥ श्रीः ॥

प्रियेगृहागतेप्रातः कांतांतन्व्यमकल्पयत्॥ व्याजोक्तिरन्यहेतूक्त्या यदाकारस्यगोपनं॥ सखि पश्यगृहारामपरागैरस्मिधूसरा॥
गूढोक्तिरन्योद्देश्यंचेद्यदन्यंप्रतिकथ्यते॥ २४०॥ वृषापेहिपरक्षेत्रादायातिक्षेत्ररक्षकः॥ विवृतोक्तिः श्लिष्टगुप्तंकविना
विवृतंयदि॥ वृषापेहिपरक्षेत्रादितिवक्तिससूचनं॥ युक्तिः परातिसंधानं क्रियया मर्मगुप्तये॥ त्वामालिखंतीं दृष्ट्वा
न्यंधनुःपौष्पंकरेलिखत्॥ लोकप्रवादानुकृतिर्लोकोक्तिरितिभण्यते॥ सहस्वकतिचिन्मासान्मीलयित्वाविलोचने
॥२४४॥ छेकोक्तिर्यत्रलोकोक्तिः स्यादर्थांतरगर्भिता॥ भुजंगएवजानीते भुजंगचरणंसखे॥ २४५॥ वक्रोक्तिः श्लेष नाति·
काकुभ्यामपरार्थप्रकल्पनं॥ मुंचमानंदिनंप्राप्तं नेहनंदीहरांतिके॥ स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्यवर्णनं॥
कुरंगैरुत्तरंगाक्षैस्तब्धकर्णैरुदीक्ष्यते॥ २४७॥ भाविकंभूतभाव्यर्थसाक्षात्कारस्यवर्णनं॥ अहंविलोकयेद्यापि
युध्यंतेत्रसुरासुराः॥ उदात्तमृद्धिसहितंश्लाघ्यंचान्योपलक्षणं॥ नासोयस्याभवद्युद्धंतद्धूर्जटिकिरीटिनोः॥ २४८॥
अत्युक्तिरद्भुतातथ्यशौर्योदार्यादिवर्णनं॥ अर्थदानत्वयिराजेंद्रे याचकाः कल्पशाखिनः॥ २५०॥ निरुक्तिर्योगतोनाम्नामप
रार्थत्वप्रकल्पनं॥ ईदृशैश्चरितैर्जानेसत्यंदोषाकरोभवान्॥ २५१॥ प्रतिषेधः प्रसिद्धस्यनिषेधस्यानुकीर्तनं॥

४ आभासत्वेविरोधस्यविरोधाभासइष्यते॥ विनापितन्वीहारेणवक्षोजौतवहारिणौ॥

१०

श्रीः

नघ्रतमेतत्किंतवक्रीडनेननिशितैः शरैः ॥ सिद्धस्येव विधानं यत्तदाहुर्बिम्बलंकृतिं ॥ पंचमोदंचने काले कोकिलः कोकिलो भवेत् ॥ हेतोर्हेतुमतो सार्धं वर्णनं हेतुरुच्यते ॥ असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवां ॥ १५७ ॥ हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते ॥ लक्ष्मीविलासविदुषां कटाक्षा वेंकटप्रभोः ॥ इत्थं शतमलंकाराः लक्षयित्वा निदर्शिताः ॥ चत्वारो रसवत्प्रेय ऊर्जस्विन्श्च समाहितं ॥ १५६ ॥

१० भावस्य चोदयः संधिः शवलत्वमिति त्रयः ॥ अष्टौ प्रमाणालंकाराः प्रत्यक्षप्रमुखाः क्रमात् ॥ एवं पंचदशान्यानप्यलंकारान्विदुर्बुधाः ॥ मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः ॥ १५८ ॥ येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥ कदा वाराणस्यामरतटिनीरोधसि वसन्वसानः कौपीनं शिरसि निदधानोञ्जलिपुटम् ॥ अये गौरीनाथ त्रिपुरहर शंभो त्रिनयन प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान् ॥ १५(७) ॥ त्वदश्वपार्थिवसंघरे शातकुणीः संत्रासतः सत्वरं यान्ती विलुंठितं सरभसे पाताकिराताननेति स्फुतिस्तिमितैः ता प्रहृद्य पुत्रकान्ते विस्मितोपक्रमाता सामुत्तरत्नं स्तनैरतितरां लोलैरपांगैरपि ॥ १६० ॥ पश्यामः किमियं प्रपद्यत इति स्थैर्यं समालंबितं किं मानात्त्वयि तीव्रं खलु शाक्य कोपः स्त्वया ॥ आश्रितः ॥ इत्यन्योन्यविलक्षदृष्टिचतुरे तस्मिन्नवस्थान्तरे सव्याजं हसितं समाधत्ति हरो वाप्यस्तु मत्कः स्तवया ॥ १६१ ॥ तदेव विश्रम्यद रसाभासस्तु अत्र न

रसस्य च परांगत्वे रसवत्प्रतिकीर्तितः ॥ परांगत्वे तु भावस्य प्रेयोलंकार इष्यते । रसभावाभासयोः स्यादूर्जस्वित्पराश्रयात् ॥ भावशान्तिः परांगत्वे समाहितमुदीरितं । भावस्य चोदु भावस्य भावोदय उदाहृतः ॥ विरुद्ध भाव योः स्पर्धाभाव संधिं जगुर्बुधाः ॥ पूर्वं पूर्वोपमर्देन भावोत्पत्तिर्हि मिश्रिता । भावोदयादेरंगत्वेऽलंकारस्तु : स्मयः क्रमात्

२१

यालुरेखिमेदिनं निनीषामिभयद्विलोकिनी ॥ अदर्शियादेनविलिख्यपत्रिणा तवेव रूपेण समः समत्प्रियः ॥ १६२ ॥ एकाम्र्त्कुसुमायुधो युधि
रिव प्रव्यक्त पुरखावलीजेतुर्मंगल पालिके वपुलकैरन्याकपोलस्थली ॥ लोलाक्षीक्षणमात्रभाविविरहे कूशासहां पश्यतो ह्रागाकर्णयनश्चवी
रभवतः प्रोढाहवाडंवरे ॥ १६३ ॥ धाकार्यशशलक्ष्मणः कचकुलं भ्रयोपिदृश्येत सादोषाणां प्रशमायनः श्रुतमहो कोपेपिकांतं मुखं ॥ किंवक्षत्य
पकल्मषाकृतधियः पद्मेपि सा दुर्लभा चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योधरं धास्यति ॥ १६४ ॥ किं तावत्सरसि सरोजमेतरादादा
हो मुखमवभासते युवत्याः ॥ संशय्यक्षणमपिनिश्चिकाय पश्चित्तविवोकैर्वकसहवासिनोपरोक्षैः ॥ १६५ ॥ यत्रैतालहरी चलाचलदृशो
व्यापारयंति भ्रुवौ यत्तत्रैवपतंति संततसममीमर्मस्पृशो मार्गणाः ॥ तच्चक्रीकृतचापपुंखितशरः प्रेंखत्करः क्रोधनो धावत्यग्रत एव शास
न धरैः सत्वरसदासां स्मरः ॥ १६५ ॥ नीलोपमाने किमुमे निमीलद्दृश्यंपंकजैः ॥ विकसंत्याच मालत्यागतोस्तंतायतेरविः ॥ १६६ ॥ तारोहिणी
विजानीहि ज्योतिषामत्रमंडले ॥ यस्यान्वितारकान्यासः शककाकारमास्थितः ॥ १६७ ॥ विवक्षतादोषमपि स्फुरान्मनात्यमेकमीश्वप्रातिसा
धुभाषितं ॥ यमामन्येत्यात्मभुवोपि कारणं कारणे कथं सलक्ष्यप्रभवो भविष्यति ॥ १६८ ॥ निर्णेतुं शक्यमस्तीति मध्यंतव नितंबिनी ॥
अन्यथानोपपद्येत पयोधरभरस्थितिः ॥ १६९ ॥ स्फुटमसदवलग्नं तन्वि निश्चिन्वते ते तदनुपलभमानास्तर्कयंतोपिलोकाः ॥ कु(

२२

किमपि तान्प्रति नैष यत्न: ॥
उत्पत्स्यतेस्ति मम कोपि समा
नधर्मा कालोह्ययं निरवधि
र्विपुला च पृथ्वी ॥

चगिरिरिवयुग्मयद्विनाधारमास्ते तदिह मकरतोद्दृत्वालं प्रतीम: ॥१७०॥ येनामकेचिदिह न: प्रथयंत्यवज्ञां जानंति मे ज्ञात: पंथ भवान्कु
तोन गरतोवर्ति निवानर्तते: वाढंब्रूहि युवा पयोदसमये त्यक्त्वा प्रियां जीवति स त्वं जीवति जीवतीति कथिता वार्ता मया विश्रुता विस्तीर्णा पृ
थिवीजनोपि विविध: किं किं न संभाव्यते ॥१७१॥ कल्याणी वक्रगाथे यलोकिकीप्रतिभाति मे: एति जीवंतमानंदो नरं वर्षशतादपि ॥
१७२॥ एवं संसृष्टिसंकरभेदेन द्वैविध्यं ऊह्यम द्वितीयस्य तु द्वौ अंगांगीभावेन समप्राधान्येन संदेहेनैकवाचकानुप्रवेशेनेति कुसुम
सौरभलोभावद्विभ्रमतभ्रमरसंभ्रमसंभ्रतभ्रोभया ॥ चलितया विदधे कलमेखलाकलकलोलकलोलदृशान्यया ॥१७३॥ तले
च्चवेपनमहीरुहाणां छाया सदा मारुतकंपितानां ॥ प्राप्तांकुरसिंहेन तमोगजानां लूनाकृतीनामिव गात्रखंडा: ॥१७४॥ अवतु न: सवि
तुस्तुरंगावलीसमतिलंघिततुंगपयोधरा ॥ स्फुरति मध्यगतारुणनायका मकरतैकलतेव नभश्रिय: ॥१७५॥ सितं स्फटिककुंभांत
स्थितश्वेतीकृतं जलं ॥ मौक्तिकं चंद्रनासूतेतत्पुष्टोस्ते समं यश: ॥१७६॥ विधुकरपरिरंभादात्तनिष्यंदपूर्णै: शशिदृशदुपक्लृप्तै
रालवालैस्तरूणां ॥ विकसितजलसेकप्रक्रियागौरवेण व्यरचि सहतचित्तस्तत्र भैमीवनेन ॥१७६॥ ॥ ॥ इतिश्रीचंद्रालोक
कारिकासमाप्ता ॥ ॥शिवम्॥ ॥श्री:॥